

# भृगुवल्ली

(तैत्तिरीय उपनिषत् तृतीय प्रश्नः)



ॐ सहनाववतु । सहनौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥

भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत् प्रोवाच । अन्नं प्राणं चक्षुश्श्रोत्रं मनो वाचमिति । तग्ं होवाच । यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्-यभिसंविशन्ति । तद्-विजिज्ञासस्व । तद्-ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ १ ॥

अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तग्ं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ २ ॥

प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्-यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तग्ं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ३ ॥

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तग्ं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ४ ॥

विज्ञानं ब्रह्मेति व्यजानात् । विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते । विज्ञानेन जातानि जीवन्ति । विज्ञानं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तग्ं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ५ ॥



# भृगुवल्ली

(तैत्तिरीय उपनिषत् तृतीय प्रश्नः)



आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति ।
आनन्दं प्रयन्त्यभिसंविशन्तीति । सैषा भार्गवी वारुणी विद्या । परमे व्योमन् प्रतिष्ठिता । य एवं वेद
प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या ॥ ६ ॥

अन्नं न निन्द्यात् । तद् व्रतम् । प्राणो वा अन्नम् । शरीरमन्नादम् । प्राणे शरीरं प्रतिष्ठितम् । शरीरे प्राणः
प्रतिष्ठितः । तदेत–दन्न–मन्ने प्रतिष्ठितम् । स य एत–दन्न–मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवान्–अन्नादो
भवति । महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या ॥ ७ ॥

अन्नं न परिचक्षीत । तद् व्रतम् । आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः
प्रतिष्ठिताः । तदेत–दन्न–मन्ने प्रतिष्ठितम् । स य एत–दन्न–मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवा–नन्नादो
भवति । महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या ॥ ८ ॥

अन्नं बहु कुर्वीत । तद् व्रतम् । पृथिवी वा अन्नम् । आकाशोऽन्नादः । पृथिव्याम् आकाशः प्रतिष्ठितः ।
आकाशे पृथिवी प्रतिष्ठिता । तदेत–दन्न–मन्ने प्रतिष्ठितम् । स य एत–दन्न–मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति ।
अन्नवा–नन्नादो भवति । महान् भवति प्रजया पशुभिर्ब्रह्म वर्चसेन । महान् कीर्त्या ॥ ९ ॥

न कंचन वसतौ प्रत्याचक्षीत । तद् व्रतम् । तस्माद् यया कया च विधया बह्वन्नं प्राप्नुयात् । अराध्यस्मा
अन्नमित्या–चक्षते । एतद्वै मुखतोऽन्नग्ं राद्धम् । मुखतोऽस्मा अन्नग्ं राध्यते । एतद्वै मध्यतोऽन्नग्ं राद्धम् ।
मध्यतोऽस्मा अन्नग्ं राध्यते । एतद्वा अन्ततोऽन्नग्ं राद्धम् । अन्ततोऽस्मा अन्नग्ं राध्यते । य एवं वेद । क्षेम इति
वाचि । योगक्षेम इति प्राणापानयोः । कर्मेति हस्तयोः । गतिरिति पादयोः । विमुक्तिरिति पायौ । इति
मानुषीस्समाज्ञाः । अथ दैवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति । यश इति पशुषु । ज्योतिरिति नक्षत्रेषु ।
प्रजाति–रमृत–मानन्द इत्युपस्थे । सर्व–मित्याकाशे । तत्प्रतिष्ठेत्–युपासीत । प्रतिष्ठावान् भवति । तन्मह
इत्युपासीत । महान् भवति । तन्मन इत्युपासीत । मानवान् भवति । तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः ।



# भृगुवल्ली



(तैत्तिरीय उपनिषत् तृतीय प्रश्नः)

तद् ब्रह्मेत्युपासीत । ब्रह्मवान् भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तस्सपत्नाः । परि येऽप्रिया भ्रातृव्याः । स यश्चायं पुरुषे । यश्चासा–वादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात् प्रेत्य । एत–मन्नमय–मात्मान–मुपसंक्रम्य । एतं प्राणमय–मात्मान–मुपसंक्रम्य । एतं मनोमय–मात्मान–मुपसंक्रम्य । एतं विज्ञानमय–मात्मान–मुपसंक्रम्य । एतम्–आनन्दमय–मात्मान–मुपसंक्रम्य । इमान् लोकन् कामान्नी कामरूप्यनु संचरन् । एतत् साम गायन्नास्ते । हा (३) वु हा (३) वु हा (३) वु । अहमन्न–महमन्न–महमन्नम् । अहमन्नादो (२) ऽहमन्नादोऽ (२) ऽहमन्नादः । अहग्ग् श्लोककृ–दहग्ग् श्लोककृ–दहग्ग् श्लोककृत् । अहमस्मि प्रथमजा ऋता(३) स्य । पूर्वं देवेभ्यो अमृतस्य ना(३) भाइ । यो मा ददाति स इदेव मा(३) वाः । अह–मन्न–मन्न–मदन्त–मा(३) द्मि । अहं विश्वं भुवन–मभ्यभवाम् । सुवर्न ज्योतीः । य एवं वेद । इत्युपनिषत् ॥ १० ॥

ॐ सहनाववतु । सहनौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥